कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः”। आकुलीभूताः प्रवृद्धाः स्वमार्गं परित्यज्य इतस्ततो गताः। अत्र कषायशब्देन क्वाथो गृह्यते। उक्ताश्च क्वाथस्य पर्य्यायाः। “शृतं क्वाथः कषायश्च निर्य्यूहः स निगद्यते, इति। “तोयपेयादिसंस्कारे निर्द्दोषं तत्र भेषजमिति”। तत्र तरुणज्वरे भेषजम् मुख्यभेषजं क्वाथरूपं न तु कल्कमनुद्दिश्य कषायः प्रतिषिध्यत इति कल्कनं तोयपेयायवाग्वादिकम्। ननु “स्वरसस्य तथा कल्कः क्वाथस्य हिमफाण्टकौ। ज्ञेया कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्” इति वचनात् स्वरसादयोऽपि कथं न निषिध्यन्ते। तत्राह “तत्र यस्तु कषायः स्यात्स वर्ज्यस्तरुणज्वरे” इति। चतुर्थभागावशेषकरणेनाष्टमभागशेषकरणे च कषायवर्णः कषायरसश्च स्यात्। स कषायः क्वाथः स तरुणज्वरे निषिद्धः। कषायस्य लक्षणमाह, “पादशिष्टः कषायः स्यात्”। अतः षडङ्गादिस्तरुणज्वरे न निषिद्धः पाकादूर्द्ध्वपाके चोक्तलक्षणाभावेन कषायत्वाभावात्। अथ तरुणज्वरे कषायस्य दोषमाह “दोषा वृद्धाः कषायेण स्तम्भितास्तरुणज्वरे। स्तभ्यन्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम्”। कषायेण स्तम्भिता प्रवृत्तये निवारिताः। यत आह कषायरसगुणान् “कषायः स्तम्भनः शीतोरूक्षः पित्तकफापहः” इत्यादि। स्तभ्यन्ते आध्मानं कुर्वन्ति न विपच्यन्ते सुखेन न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विपच्यन्ते इति यावत्”। [अमरः।

**क्वाथोद्भव:** न० क्वाथादुद्भवति उद्+भू-अच्। तुत्थाञ्जने

**क्वेल** कम्पे अक० गतौ सक० प० सेट् कवि०। क्वेलति अक्वेलीत् ऋदित् चङि अचिक्वेलत् त।

**क्ष** पु० क्षि-बा० ड। १संवर्त्ते २राक्षसे ३नरसिंहे ४विद्युति ५क्षेत्रे ६क्षेत्रपाले ७नाशे च मेदि०। तस्य वाचकशब्दाः तन्त्रशास्त्रे वर्णाभिधाने उक्ता यथा

“क्षः कोपस्तुम्बुकः कालोरूक्षः संवर्त्तकः परः। नृसिंहोविद्युता माया महातेजा युगान्तकः। परात्मा क्रोधसंहारी वर्णान्तो मेरुवाचकः। सर्वाङ्गः सागरः कामः संयोगान्तस्त्रिपूरकः। क्षेत्रपालो महाक्षोभी मातृकान्तोऽनलः क्षयः। मुखं कव्यवहानन्ता कालजिह्वा गणेश्वरः। छायापुत्रश्च संघातोमलयश्रीर्ल्ललाटगः” अत्र संयोगान्त इत्युक्तेः शब्दकल्पद्रुमे क्षकारस्य वर्णान्तरत्वकल्पनम् लोकशास्त्रविरुद्धत्वादतीव प्रामादिकम्। तथाहि अस्य कषयोः संयोगजत्वेन कादित्वम्। पृथग्वर्णत्वे चक्षमे चुक्षोद चिक्षेपेत्यादिकपदं न सिद्ध्येत् असंयुक्ततया हलादिशेषाप्रसक्तौ कवर्गादित्वाभावेन चुत्वाप्रसक्तेः। किञ्च संयुक्तवर्णात् पूर्व्वस्य गुरुत्वेन “निपीय यस्य क्षितिरक्षिणः कथाम्” नैषधे “लाङ्गूलविक्षेपविसर्पिशोभैः कुमारादौ काव्ये च “गजारूढ़ोयातिक्षितिपतिरित्यादौ” “दक्षिणे कालिकेति” च भैरवतन्त्रोक्तकालीस्तवे च सर्वत्र तत्पूर्व्वस्य गुरुत्वे सत्येव छन्दोनुगुणता असंयुक्तवर्णत्वे सर्वत्र छन्दोभङ्गः स्यात्। न च तस्यासंयुक्ततया क्वचिदपि तत्पूर्व्वस्य लघुत्वं दृष्टम्। अतएव कविकल्पद्रुमे” “स्वदाद्यन्तादिमक्रमः” इति प्रतिज्ञाय कादिष्वेव क्षकारादिधातुपाठः मेदिन्यादौ कोषेऽपि तथैव कादिषु तस्य पाठः।

तन्त्रे तु कषयोः संयोगजत्वेऽपि मातृकावर्णानामेकपञ्चाशत्संख्यापरिपूर्त्त्यै लकारवत् पृथक् कीर्त्तनं न्यासादिकार्य्यार्थं “पञ्चाशल्लिपिभिर्म्माला विहिता सर्व्वकर्मसु। अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता। क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम!। अनया सर्वमन्त्राणां जपः सर्वसमृद्धिदः” इति गौतमतन्त्रोक्तजपाङ्गमालाकल्पनार्थञ्च न वर्णान्तरत्वार्थम्। एवं सर्वसामञ्जस्ये वर्णान्तरत्वकल्पनं लोकशास्त्रविरुद्धत्वादुपेक्ष्यम्। “विशेषं कथयाम्यद्य प्रोच्चार्य्याः कण्ठतः स्वराः। ऋद्वयं जिह्वया मूर्द्ध्नि लृद्वयं दन्तजिह्वया। मुखस्थानाद्भलोवाच्याः क्षकारः कण्ठघातजः” इति वरदातन्त्रे १०पटले तस्य कण्ठस्थानोद्भवत्वोक्तिः। आद्यककाराभिप्रायेण द्रष्टव्या। “अतएव षान्ताः स्युर्यदि वा क्षान्ता वर्णानामनुरोधतः। पृथक् क्रमेण वक्ष्यन्ते तथाऽप्येते समन्वयात्” विश्वप्रकाशे तस्य उभयरूपतासमन्वय उक्तः। तत्समन्वयश्चोक्तरीत्या बोध्यः। एतेन वङ्गानां खतुल्यत्वेन मैथिलानां च तस्य छकारत्वेनोच्चारणं प्रामादिकमेव।

**क्षज** कृच्छ्रजीवने इदित् चुरा० उभ० अक० सेट्। क्षञ्जयति ते अचक्षञ्जत् त। क्षञ्जयां बभूव आस चकार चक्रे।

**क्षज** बधे भ्वा० आ० सक० सेट् घटा०। क्षजते अक्षजिष्ट। चक्षजे मित् क्षजा। क्षजयति ते अचिक्षजत् त।

**क्षज** गतौ दाने च भ्वा० आत्म० इदित् सक० सेट्। क्षञ्जते अक्षञ्जिष्ट चक्षञ्जे। कर्म्मणि क्षञ्ज्यते घटा० क्षञ्जयति इणि अक्ष(क्षा)ञ्जि णमुलि क्षञ्जं क्षञ्जं क्षाञ्जं क्षाञ्जम् अनुपधाया अपि दीर्घः

**क्षण** बधे तना० उभ० सक० सेट्। क्षणोति क्षणुते। अक्ष-